# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 02-02-2014 अङ्काः–100

पूर्वाह्ने - 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 एकवाक्येन संस्कृतभाषया उत्तरं लिखत । (अष्टानामेव)** 8×1=8

1. वाग्देवता स्वहस्तेषु किं किं धारयति ?
2. कालिदासः कस्य सभायामासीत् ?
3. विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?
4. एकलव्यः कः ?
5. वृक्षस्योपरि का स्थिता ?
6. मल्लस्य नाम किम् ?
7. शङ्कराचार्यः कदा अवातरत् ?
8. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?
9. धीराः कस्मात् पदं न प्रविचलन्ति ?
10. सर्वे देवाः कं स्तोतुं समुपचक्रिरे ?

**2 द्वित्रैः वाक्यैः संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 5×2=10

1. नव गोप्यानि कानि ?
2. कीदृशाय शम्भवे नतिः ?
3. शुकशावकयोर्नाम कम् ? शावकौ काभ्यां व्यक्रीणात् ?
4. पञ्चतन्त्रस्य रचयिता कः ? पञ्चतन्त्राणां नामानि लिखत ।
5. श्री शङ्कराचार्यस्य शिष्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?
6. विद्यार्थी चेत् किं त्यजेत् ? सुखार्थी किं त्यजेत् ?



पश्चादनुवर्तते

**3** **संस्कृतभाषया उत्तरं लिखत । (त्रयाणामेव)** 3×3=9

1. हनुमान् कः ? सः समुद्रस्योपरि किं किं चकार ?
2. विष्णुशर्मणः प्रतिज्ञा का ?
3. षड्दोषाः के ?
4. राक्षसाः के ?

**4** **मातृभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (त्रयाणामेव)** 3×4=12

1 'विक्रमस्यौदार्यम्' कथायाः सारांशं लिखत ।
2. 'पतिव्रतायाः माहात्म्यम्' अस्य पाठस्य सारांशं लिखत ।
3. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?
4. विष्णोराकारः कीदृशः ? सः कैः ध्यानगम्यः ?

**5** **ससन्दर्भं विवृणुत । (चतुर्णामेव )** 4×3=12

1. स च वेदवेदाङ्गवित् ।
2. तस्य चक्षुषी विदारयत ।
3. शरप्रयोगे बलवत्तरः भविष्यति ।
4. अत्र स्थित्या वयं निहताः ।
5. 'नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता' ।

**6** **मातृभाषया अन्वयानुसारम् अर्थं लिखत । (द्वयोरेव)** 2×3=6

1. अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
   षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।
2. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
   किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ।।
3. लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।
   सीतां विचन्वन्नद्राक्षीत् निद्राणं निशि रावणम् ।।

**7 श्लोकद्वयं पूरयत ।** 2×3=6

1. वागीशाद्याः .......................। ........................ गजाननम् ।।
2. निन्दन्तु .........................। ....................... न धीराः ।।
3. विद्यया ...........................। ...................... राक्षसाः ।।

**8 मातृभाषया अनुवादं कुरुत ।** 5

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचित् प्रभाते लघुपतनकनामा वायसः प्रबुद्धः, कृष्णवर्णं, ऊर्ध्वकेशं, यमकिङ्कराकारं, व्याधमपश्यत् । तमवलोक्याचिन्तयत् – ''अद्य प्रातरेवानिष्टदर्शनं जातम्। न जाने किमनिष्टं भविष्यति !'' इति ।

**9 रिक्तस्थानानि पूरयत ।** 4×1=4

1. हस्ते किं ते ? .................. ।
2. राजा बन्धुः ...................... ।
3. विधिरहो .................. मे मतिः ।
4. 'स्था' धातोः लट् उत्तमपुरुषैकवचनम् ..................... ।

**10 पर्यायपदानि लिखत । (त्रयाणामेव)** 3×1=3

1. मुखम् 2. भुजगः 3. ख्यातः 4. प्रतिकृतिः

**11 विरुद्धार्थकपदानि लिखत । (त्रयाणामेव)** 3×1=3

1. आद्याय 2. सर्पः 3. दिवा 4. भद्रम्

**12 वाक्यदोषं परिहरत ।** 3×1=3

1. भवान् पाठं पठ । 2. रामस्य नमः ।
3. अहं मित्रस्य सह क्रीडाति ।

**13 त्रयाणाम् वाक्यानि रचयत ।** 3×1=3

1. एत्य 2. साधयामि 3. अन्तिकम् 4. सम्यक्



पश्चादनुवर्तते

**14** **क्रियापदमेकं सर्वपुरुषवचनेषु लिखत ।** 1×3=3

1. वेत्ति 2. निन्दतु

**15** **त्रयाणां सन्धिं विभज्य नाम लिखत ।** 3×1=3

1. सर्वेऽपि 2. अतस्तस्य 3. रामेति 4. अप्येकदा

**16** **प्रयोगपरिवर्तयत । (द्वयोः)** 2

1. रामः रावणं हतवान् ।
2. पुत्रेण पिता अनम्यत ।
3. अहं पत्रं लिखितवान् ।

**17** **समूहेतरपदं लिखत ।** 1×3=3

1. अपठन्, कृतवान्, अलिखन्, अगच्छन् ।
2. आदाय, रामाय, देवाय, जनकाय ।
3. शुकः, वायसः, कपोतः, पक्षी ।

**18** **लोकोक्तिमेकाम् अर्थेन सह विवृणुत ।** 1×3=3

1. क्लेशः ........................................... ।
2. यादृशं भक्षयेदन्नं ................................. ।

**19** **व्याकरणविशेषं लिखत : (एकस्य)** 2×1=2

1. वाग्देव्यै नमः ।
2. वायसेन सह ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 02-02-2014 | अङ्काः–50
अपराह्ने – 1-30 तः 3-00 पर्यन्तम् | समयः–सार्धैकहोरा

1 **दशवाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।** 5

1. धेनुः 2. दीपावली 3. पुस्तकभण्डारः

2 **संस्कृतभाषया पत्रमेकं लिखत ।** 5

1) अनारोग्यनिमित्तं विरामं प्रार्थयन् कक्ष्याध्यापकं प्रति पत्रं लिखत ।
2) स्व-अध्ययनविषये अग्रजाय / पित्रे पत्रं लिखत।

3 **द्वयोः लक्षणं सोदाहरणं स्वोत्तरभाषया लिखत ।** 2x3=6

1. उपसर्गाः 2. विशेषणम् 3. क्त्वा-ल्यप् प्रत्ययौ

4 **त्रिषुपुरुषवचनेषु क्रियारूपाणि लिखत । (द्वयोः)** 2x3=6

1. अपश्यत् 2. गमिष्यति 3. मोदताम्

5 **एकस्य शब्दरूपाणि सर्वविभक्तिवचनेषु लिखत ।** 1x4=4

1. राजन् 2. मातृ 3. युष्मद्

6 **वाक्यदोषान् परिहरत ।** 3x1=3

1. देवस्य नमः ।
2. वत्सः धेनोः सह गच्छति ।
3. बालाः क्रीडाङ्गणे खेलति ।

7 **प्रयोगं परिवर्तयत ।** 3x1=3

1. भक्तः देवं नमति ।
2. मया चित्रं दृश्यते ।
3. शिक्षकः पाठं बोधितवान् ।



पश्चादनुवर्तते

**8 कृदन्ताव्ययं चित्वा नाम लिखत ।** 3x1=3

1. रामो वनं गत्वा दैत्यान् समहरत्
2. छात्राः श्लोकान् पठितुम् आरभन्ते ।
3. अहं उत्तरं विलिख्य पठामि ।

**9 अन्यलिङ्गरूपं लिखत । (त्रयाणां)** 3x1=3

1. पठितवान् 2. पुत्री 3. एतस्य 4. शिक्षकः

**10 वाक्यमेकं कर्णाटकभाषया आङ्लभाषया वा विवृणुत ।** 1x2=2

1. यथा बीजं तथा अङ्कुरः ।
2. नास्ति मातृसमो बन्धुः ।

**11 मातृभाषया अनुवादं कुरुत ।** 5

1. मृगाः आहाराय चरन्तु ।
2. विद्यार्थिनः संस्कृतभाषायां वदेयुः ।
3. देवः सर्वत्र वसति, सः सर्वव्यापी ।
4. वत्से! वन्दस्व देवताः ।
5. वयं कुसुमैः देवमर्चामः ।

**12 संस्कृतभाषया अनुवादं कुरुत ।** 5

1. ಹುಡುಗರು ಮಿಠಾಯಿಗಳಿಂದ ಸಂತೋಷಿಸಿದರು.
   The boys enjoyed with sweetmeats.
2. ನಾವು ಪರೋಪಕಾರಕ್ಕಾಗಿ ಜೀವಿಸೋಣ.
   Let us live for helping others.
3. ಬುದ್ಧಿವಂತನಾದ ಪುರುಷನು ಸುಖದಿಂದ ಜೀವಿಸುತ್ತಾನೆ.
   An intelligent person lives happily.
4. ವಿದ್ಯಾಭ್ಯಾಸಕ್ಕಾಗಿ ಕಷ್ಟಗಳನ್ನು ಸಹಿಸಿರಿ.
   Endure the difficulties for the sake of learning.
5. ನಾಳೆ ನನ್ನ ಹುಟ್ಟುಹಬ್ಬವು ನಡೆಯುವುದು.
   My birthday will take place tomorrow.

* * * * *